শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে ত্রিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ত্রিংশং দশকম্॥

## ৱামনাৱতারৱর্ণনম্

শক্রেণ সংযতি হতোঽপি বলির্মহাত্মা
 শুক্রেণ জীৱিততনুঃ ক্রতুৱর্ধিতোষ্মা।
ৱিক্রান্তিমান্ ভযনিলীনসুরাং ত্রিলোকীং
 চক্রে ৱশে স তৱ চক্রমুখাদভীতঃ॥ **30.1**॥

পুত্রার্তিদর্শনৱশাদদিতির্ৱিষণ্ণা
 তং কাশ্যপং নিজপতিং শরণং প্রপন্না।
ৎৱৎপূজনং তদুদিতং হি পযোৱ্রতাখ্যং
 সা দ্বাদশাহমচরৎ ৎৱযি ভক্তিপূর্ণা॥ **30.2**॥

তস্যাৱধৌ ৎৱযি নিলীনমতেরমুষ্যাঃ
 শ্যামশ্চতুর্ভুজৱপুঃ স্ৱযমাৱিরাসীঃ।
নম্রাং চ তামিহ ভৱত্তনযো ভৱেযং
 গোপ্যং মদীক্ষণমিতি প্রলপন্নযাসীঃ॥ **30.3**॥

ৎৱং কাশ্যপে তপসি সন্নিদধত্তদানীং
 প্রাপ্তোঽসি গর্ভমদিতেঃ প্রণুতো ৱিধাত্রা।
প্রাসূত চ প্রকটৱৈষ্ণৱদিৱ্যরূপং
 সা দ্বাদশীশ্রৱণপুণ্যদিনে ভৱন্তম্॥ **30.4**॥

পুণ্যাশ্রমং তমভিৱর্ষতি পুষ্পৱর্ষৈ -
 র্হর্ষাকুলে সুরগণে কৃততূর্যঘোষে।

বধ্ৱাঽঞ্জলিং জয জযেতি নুতঃ পিতৃভ্যাং
ৎৱং তৎক্ষণে পটুতমং ৱটুরূপমাধাঃ॥ **30.5** ॥

তাৱৎপ্রজাপতিমুখৈরুপনীয মৌঞ্জী -
দণ্ডাজিনাক্ষৱলযাদিভিরর্চ্যমানঃ।
দেদীপ্যমানৱপুরীশ কৃতাগ্নিকার্য -
স্ত্ৱং প্রাস্থিথা বলিগৃহং প্রকৃতাশ্ৱমেধম্॥ **30.6** ॥

গাত্রেণ ভাৱিমহিমোচিতগৌরৱং প্রা -
গ্ৱ্যাৱৃণ্ৱতেৱ ধরণীং চলযন্নযাসীঃ।
ছত্রং পরোষ্মতিরণার্থমিৱাদধানো
দণ্ডং চ দানৱজনেষ্ৱিৱ সন্নিধাতুম্॥ **30.7** ॥

তাং নর্মদোত্তরতটে হযমেধশালা -
মাসেদুষি ৎৱযি রুচা তৱ রুদ্ধনেত্রৈঃ।
ভাস্ৱান্ কিমেষ দহনো নু সনৎকুমারো
যোগী নু কোঽযমিতি শুক্রমুখৈশ্শশঙ্কে॥ **30.8** ॥

আনীতমাশু ভৃগুভির্মহসাঽভিভূতৈ -
স্ত্ৱাং রম্যরূপমসুরঃ পুলকাৱৃতাঙ্গঃ।
ভক্ত্যা সমেত্য সুকৃতী পরিণিজ্য পাদৌ
তত্তোযমন্ৱধৃত মূর্ধনি তীর্থতীর্থম্॥ **30.9** ॥

প্রহ্লাদৱংশজতযা ক্রতুভির্দ্ৱিজেষু
ৱিশ্ৱাসতো নু তদিদং দিতিজোঽপি লেভে।
যত্তে পদাম্বু গিরিশস্য শিরোভিলাল্যং
স ৎৱং ৱিভো গুরুপুরালয পালযেথাঃ॥ **30.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে ত্রিংশং দশকং সমাপ্তম্॥